# ॥ નિરુક્તોપનિષત્ ॥

.. niruktopaniShat ..

sanskritdocuments.org

October 20, 2017

# .. niruktopaniShat ..

# ॥ નિરુક્તોપનિષત્ ॥

## Sanskrit Document Information

Text title : niruktopaniShat

File name : niruktopaniShat.itx

Category : upanishhat, vedanta

Location : doc_upanishhat

Proofread by : Sunder Hattangadi sunderh at hotmail.com, Radim Navyan radimnavyan at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : October 20, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

October 20, 2017

*sanskritdocuments.org*

સ યદ્યનુરુધ્યતે તદ્ભવતિ । યદિ ધર્મોઽનુરુધ્યતે તદ્દેવોદ્ભવતિ ।
યદિ જ્ઞાનમનુરુધ્યતે તદમૃતો ભવતિ । યદિ કામમનુરુધ્યતે
સઞ્ચરતાં ઇમાં યોનિં સન્દધ્યાત્તદિદમત્ર મનઃ શ્લેષ્મરેતસઃ
સમ્ભવતિ । શ્લેષ્મણો રસઃ । રસાચ્છોણિતમ્ । શોણિતાન્માંસમ્ ।
માંસાન્મેદઃ । મેદસઃ સ્નાવા । સ્નાવોઽસ્થીનિ । અસ્થિભ્યો મજ્જા ।
મજ્જાતો રેતઃ । તદિદં યોનૌ રેતઃ સિક્તં પુરુષઃ સમ્ભવતિ ।
શુક્રાતિરેકે પુમાન્ ભવતિ । શોણિતાતિરેકે સ્ત્રી ભવતિ ।
દ્વાભ્યાં સમેન નપુંસકો ભવતિ । શુક્રભિન્નેન યમો ભવતિ ।
શુક્રશોણિતસંયોગાન્માતૃપિતૃસંયોગાચ્ચ કથમિદં શરીરં
પરં સંયમ્યતે । સૌમ્યો ભવત્યેકરાત્રોષિતં કલલં ભવતિ ।
પઞ્ચરાત્રાબુદ્બુદઃ । સપ્તરાત્રાત્ પેશી । દ્વિસપ્તરાત્રાદર્બુદઃ ।
પઞ્ચવિંશતિરાત્રસ્થિતો યોનૌ ઘનો ભવતિ । માસમાત્રાત્
કઠિનો ભવતિ । દ્વિમાસાભ્યન્તરે શિરઃ સમ્પદ્યતે । માસત્રયેણ
ગ્રીવાવ્યાદેશઃ । માસચતુષ્કેણ ત્વગ્વ્યાદેશઃ । પઞ્ચમે માસે
નખરોમવ્યાદેશઃ । ષષ્ઠે મુખનાસિકાક્ષિશ્રોત્રં ચ સમ્ભવતિ ।
સપ્તમે ચલનસમર્થો ભવતિ । અષ્ટમે બુદ્ધ્યાધ્યવસ્યતે ।
નવમે સર્વાઙ્ગસમ્પૂર્ણો ભવતિ ॥

મૃતશ્ચાહં પુનર્જાતો જાતશ્ચાહં પુનર્મૃતઃ ।
નાનાયોનિસહસ્રાણિ મયા યાન્યુષિતાનિ વૈ ॥

આહારા વિવિધા ભુક્તાઃ પીતા નાનાવિધાઃ સ્તનાઃ ।
માતરો વિવિધા દૃષ્ટાઃ પિતરઃ સુહૃદસ્તથા ॥

અવાઙ્મુખઃ પીડ્યમાનો જન્તુશ્ચૈવ સમન્વિતઃ ।
સાઙ્ખ્યં યોગં સમભ્યસ્ય પુરુષં પઞ્ચવિંશકમ્ ॥ ઇતિ ॥

તતશ્ચ દશમે માસે પ્રજાયતે । જાતશ્ચ વાયુના સ્પૃષ્ટો ન સ્મરતિ
જન્મ મરણમ્ । અન્તે ચ શુભાશુભં કર્મૈતચ્છરીરસ્ય પ્રામાણ્યમ્ ॥

ઇતિ નિરુક્તોપનિષદિ વિંશતિતમોધ્યાયઃ ।

અષ્ટોત્તરં સન્ધિશતમષ્ટાકપાલં શિરઃ સમ્પદ્યતે । ષોડશ
વપાપલાનિ । નવ સ્નાયુશતાનિ । સપ્તશતં પુરુષસ્ય મર્માણિ ।
અર્ધચતસ્રો રોમાણિ કોટયઃ । હૃદયં હ્યષ્ટકપલાનિ । દ્વાદશકપલાનિ

જિહ્વા । વૃષણો હૃષ્ટસુપર્ણૌ । તત ઉપસ્થગુદયોન્ચેતન્મૂત્રપુરીષં
કસ્માદાહારાપાનસિક્તત્વાદનુપચતિ । કર્મણા અન્યોન્યં જાયત ઇતિ । તં
વિદ્યાકર્મણી સમન્વારભેતે પૂર્વપ્રજ્ઞા ચ । મહત્યજ્ઞાનતમાસિ મગ્નો
જરામરણક્ષુત્પિપાસાશોકક્રોધદ્રોહલોભમોહમદભયમત્સર-
હર્ષવિષાદેર્ષ્યાસૂયાત્મકૈર્દ્વન્દ્વૈરભિભૂયમાનઃ
સોઽસ્માદાર્જવં જવીભાવનાન્તં નિર્મુચ્યતે । સોઽસ્માદાન્તં મહાભૂમિકાવત્
શરીરાન્નિમેષમાત્રૈઃ પ્રક્રમ્ય પ્રકૃતિભિરભિપરીત્ય તૈજસં
શરીરં કૃત્વા કર્મણાનુરૂપં ફલમનુભૂય તસ્ય સંક્ષયે પુનરિમં
લોકં પ્રતિપદ્યતે ॥

ઇતિ નિરુક્તોપનિષદિ એકવિંશોઽધ્યાયઃ ॥

ઇતિ નિરુક્તોપનિષત્ સમાપ્તા ॥

Proofread by Sunder Hattangadi sunderh at hotmail.com,
Radim Navyan radimnavyan at gmail.com

.. niruktopaniShat ..

Searchable pdf was typeset using generateactualtext feature of XƎLATEX 0.99996

on October 20, 2017

Please send corrections to *sanskrit@cheerful.com*